# shrIkAlAntakAShTakam

# શ્રીકાલાન્તકાષ્ટકમ્

## Document Information

Text title : kAlAntakAShTakam

File name : kAlAntakAShTakam.itx

Category : aShTaka, shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_shiva

Author : sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : November 7, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીકાલાન્તકાષ્ટકમ્

(શ્રીગરલપુરે)

શ્રીગણેશાય નમઃ ॥

કમલાપતિમુખસુરવરપૂજિત કાકોલભાસિતગ્રીવ ।
કાકોદરપતિભૂષણ કાલાન્તક પાહિ પાર્વતીનાથ ॥ ૧॥

કમલાભિમાનવારણદક્ષાઙ્ઘ્રે વિમલશેમુષીદાયિન્ ।
નતકામિતફલદાયક કાલાન્તક પાહિ પાર્વતીનાથ ॥ ૨॥

કરુણાસાગર શમ્ભો શરણાગતલોકરક્ષણધુરીણ ।
કારણ સમસ્તજગતાં  કાલાન્તક પાહિ પાર્વતીનાથ ॥ ૩॥

પ્રણતાર્તિહરણદક્ષ પ્રણવપ્રતિપાદ્ય પર્વતાવાસ ।
પ્રણમામિ તવ પદાબ્જે કાલાન્તક પાહિ પાર્વતીનાથ ॥ ૪॥

મન્દાર નતજનાનાં વૃન્દારકવૃન્દગેયસુચરિત્ર ।
મુનિપુત્રમૃત્યુહારિન્ કાલાન્તક પાહિ પાર્વતીનાથ ॥ ૫॥

મારારણ્યદવાનલ માયાવારીન્દ્રકુમ્ભસઞ્જાત ।
માતઙ્ગચર્મવાસઃ કાલાન્તક પાહિ પાર્વતીનાથ ॥ ૬॥

મોહાન્ધકારભાનો મોદિતગિરિજામનઃસરોજાત ।
મોક્ષપ્રદ પ્રણમતાં કાલાન્તક પાહિ પાર્વતીનાથ ॥ ૭॥

વિદ્યાનાયક મહ્યં વિદ્યાં દત્ત્વા નિવાર્ય ચાવિદ્યામ્ ।
વિદ્યાધરાદિસેવિત કાલાન્તક પાહિ પાર્વતીનાથ ॥ ૮॥

કાલાન્તકાષ્ટકમિદં પઠતિ જનો યઃ કૃતાદરો લોકે ।
કાલાન્તકપ્રસાદાત્કાલકૃતા ભીર્ન સમ્ભવેત્તસ્ય ॥ ૯॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીકાલાન્તકાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*shrIkAlAntakAShTakam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*